

QUESTION PAPERS

2024

aglasem.com

Roll No.....

Total No. of Questions : **13**] [Total No. of Printed Pages : **16**

M–208–IX–2324

SANSKRIT

Time Allowed : 3 Hours Maximum Marks : 80

परीक्षार्थी यथासम्भव अपने शब्दों में ही उत्तर दें।

प्रत्येक प्रश्न के अंक उसके सामने दिए गए हैं।

विशेष निर्देश :

(i) **प्रश्नों के उत्तर देते समय जो प्रश्न-संख्या प्रश्न-पत्र पर दर्शाई गए है, उत्तर-पुस्तिका पर वही प्रश्न-संख्या** लिखना अनिवार्य है।

(ii) उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़िए।

(iii) सभी प्रश्न अनिवार्य हैं।

(iv) सुलेख का विशेष ध्यान दीजिए।

खण्ड–क

(अपठित अवबोधनम्)

1. अधोलिखितं गद्यांशं पठित्वा प्रश्नानां उत्तराणि निर्देशानुसारं लिखत–

संस्कृत भाषा देव भाषा, प्रायः सर्वासां भारतीय भाषाणां जननी प्रादेशिक-भाषाणाञ्च प्राणभूता इति। यथा प्राणी अन्नेन जीवति परन्तु वायुं विना अन्नमपि जीवनं रक्षितुं न शक्नोति, तथैव अस्मद्देशस्य कापि भाषा संस्कृत-भाषा अवलम्बं विना जीवितुमक्षमेति निःसंशयम्।

अस्यामेव अस्माकं धर्मः, अस्माकं इतिहासः अस्माकं भूतं भविष्यञ्च सर्वं सुसन्निहितमस्ति। अस्माकं दर्शनशास्त्रं, ज्योतिःशास्त्रं, पुराणानि च संस्कृत-भाषायां लिखितानि सन्ति।

(i) एक पदेन उत्तरत : 2

(क) का देव-भाषा?

(ख) प्राणी केन जीवति?

(ii) पूर्ण वाक्येन उत्तरत : 1

सर्वासां भाषाणां जननी, प्राणभूता च का भाषा?

(iii) निर्देशानुसारं उत्तरत : 2

(क) 'धर्मः' इति शब्दस्य विलोमशब्दः कः?

(ख) 'प्राणी अन्नेन जीवति' वाक्येऽस्मिन् क्रियापदं किम्?

2. अधोलिखितं अनुच्छेदं पठित्वा अनुच्छेदाधारित-प्रश्नानामुत्तराणि लिख्यन्ताम्-

अस्ति केरलेषु कालटिनामको ग्रामः। जगद्गुरुः श्रीशङ्कराचार्यः तस्मिन् ग्रामे जन्म लेभे। अस्य पिता शिवगुरुः माता आर्याम्बा चास्ताम्। शङ्करस्य जन्मनः प्रागेव पिता दिवंगतः। मातैव पुत्रस्य पालनमकरोत्। यथाकालमुपनीतः स गुरुमुपागच्छत्। जन्मनैव प्रतिभासम्पन्नतया असौ कुलोचिताः विद्याः शीघ्रमेव अधीतवान्। श्रूयते यत् निजायुषः षष्ठे वर्षे शङ्कराचार्येण भारतस्य विद्वांसः शास्त्रार्थे प्राजिताः। माता तं गृहस्थं कर्तुमैच्छत्। परन्तु मनसा वचसा कर्मणा च विरक्तः शंकरः- 'मातः! संन्यासः मह्यं रोचते, तदर्थं अनुमतिं प्रदच्छ' इति प्रार्थयत। माता पुत्रस्य प्रार्थनां न स्वीकृतवती। एकदा स्नातुं नदीं गतः शंकरः मकरेण गृहीतः उच्चैः आक्रोशत्।

आक्रोशं श्रुत्वा नदीतीरं गता माता पुत्रं मकरेण गृहीत-मपश्यत्। शंकरः मातरमवदत्-'अम्ब, यदि संन्यासं ग्रहीतुं मामनुमंस्यसे तर्हि अहं मकरात् मुक्तो भविष्यामि' इति। चेतसा अनिच्छन्ती अपि विवशा माता-'वत्स, यथा तुभ्यं रोचते तथा कुरू' इति कष्टेन अकथयत्।

(i) एकपदेन उत्तरत : 2

(क) जगद्गुरुः शंकराचार्यः कुत्र जन्म अलभत?

(ख) शङ्कराचार्यस्य जन्मनः प्रागेव कः दिवंगतः?

(ii) पूर्ण वाक्येन उत्तरत : 1

जन्मनैव प्रतिभा सम्पन्नः कः आसीत्?

(iii) गद्यांशं पठित्वा तृतीयांश-साररूपेण लिखत- 2

(iv) प्रदत्त-गद्यांशस्य शीर्षकं चित्वा लिखत- 1

(अ) शिव गुरुः

(ब) शंकराचार्यः

(स) आर्याम्बा

(द) केरलः

(v) 'जन्मनः' अस्य पदस्य विभक्ति-वचनं च लिखत। 1

खण्ड–ख

(रचनात्मकं कार्यम्)

3. मञ्जुषातः उचित-पदानि चित्वा पत्रे रिक्तस्थानानि पूरयन्ताम्– 5

प्रधानाचार्यः, आज्ञाकारी, पितृहीनः अनाथः, अर्थाभावात् शक्नोमि, अहम्, अनुग्रहीष्यति, अस्मिन, मदीयाम्।

सेवायाम्

श्रीमन्तः (i) ..... महोदयाः,

राजकीय वरिष्ठमाध्यमिकः विद्यालयः,

क, ख, ग।

महोदयः,

सविनयं निवेदयामि यत् अहम् (ii).....विद्यालये नवम्यां कक्षायां पठामि (iii) ..... अहं विद्यालयस्य शिक्षाशुल्कं दातुं नं (iv).....। (v)..... अहं (vi) ..... अस्मि। अत एव अहं शिक्षाशुल्कं दातुं न शक्नोमि। (vii)..... विश्वस्तः अस्मि यत् भवान् (viii)..... स्थितिं विचार्य निः शुल्कतया माम् (ix).....।

भवतः (x)..... शिष्यः

कृशकुमारः।

4. अधोलिखित–विषयेषु एकं विषयमधिकृत्य पञ्च वाक्यानि लिखत– 5

(क) मम प्रियः अध्यापकः

(ख) मम प्रियः नेता

(ग) दीपावली

खण्ड–ग

(अनुप्रयुक्त व्याकरणम्)

5. अधोलिखित–पदेषु सन्धि अथवा विच्छेदं कुरुत–(षड्) 6

(अ) परम + अर्थः (ब) कवि + इन्द्रः

(स) पूर्ण + इन्दुः (द) सु + आगतम्

(य) सच्चरितम् (र) कृष् + नः

(ल) उत् + देश्यम्

6. अधोलिखित-वर्णानां समुचितं उच्चारण-स्थानं कोष्ठकात् विचित्य लिखत (कोऽपि पञ्च) 5

(अ) घ – (ओष्ठ/कण्ठ)

(ब) झ – (तालु/दन्त)

(स) ठ – (कण्ठ/मूर्धा)

(द) थ – (दन्त/तालु)

(य) इ – (तालु/दन्त)

(र) प – (तालु/ओष्ठ)

7. अधोलिखित-वाक्येषु प्रकृति-प्रत्ययोः संयोगेन निर्मितानां शब्दानां प्रयोगेन रिक्त-स्थानानि पूरयत (पञ्च) 5

(अ) छात्रः श्लोकं ..... गच्छति । (पठ्+शतृ)

(ब) रामः समाचारं ..... रोदिति। (श्रु+कत्वा)

(स) छात्रः गुरुं ..... उपविशति। (प्र+नम्+ल्यप्)

(द) ..... नरः सम्मानं लभते। (ज्ञा+क्तवतु)

(य) अस्माभिः गीता ..... (पठ्+अनीयर्)

(र) सुरेशेण पाठः ..... (पठ्+क्त्)

8. अधोलिखित-शब्देषु उचित-विभक्ति-वचनानुसारं पदं चित्वा रिक्त स्थानानि पूरयत (षड्) 6

(अ) ..... नमः।

(i) - देवस्य (ii) - देवाय

(iii) - देवात् (iv) - देवम्

(ब) ..... छात्रः फलं खादति।

(i) अमी (ii) अमुष्य

(iii) असौ (iv) अमुष्मात्

(स) पिता ..... मोदकं ददाति।

(i) सुताय (ii) सुतस्य

(iii) सुताभ्याम् (iv) सुतौ

(द) सुदेशः ..... बिभेति।

(i) व्याघ्रम् (ii) व्याघ्रात्

(iii) व्याघ्रस्य (iv) व्याघ्रे

(य) राघवः ..... आरोहति।

(i) अश्वाय (ii) अश्वं

(iii) अश्वात् (iv) अश्वस्य

(र) रमा देव्याः ..... करोति

(i) पूजनं (ii) पूजा

(iii) पूजायै (iv) पूजायाः

(ल) वयम् ..... क्रीड़ामः

(i) कन्दुकेन (ii) कन्दुकात्

(iii) कन्दुकस्य (iv) कन्दुकाय

9. अधोलिखित -धातुषु उचित पुरुष वचनानुसारं पदं विचित्य रिक्तस्थानानि पूरयन्ताम् (षड्) 6

(अ) स पुस्तकालयात् पुस्तकं आदाय पाठं .....।

(i) पठतः (ii) पठति

(iii) पठथ (iv) पठसि

(ब) छात्रौ नाटकं .....।

(i) द्रक्ष्यति (ii) द्रक्ष्यसि

(iii) पश्यतः (iv) पश्यति

(स) सुरेशः श्वः दिल्लीं .....।

(i) गच्छति (ii) गमिष्यति

(iii) गच्छामि (iv) गमिष्यामि

(द) युवाम् .....।

(i) तिष्ठति (ii) तिष्ठन्ति

(iii) तिष्ठयः (iv) तिष्ठसि

(य) रामः सुरेशश्च पाद कन्दुकेन .....।

(i) क्रीडतः (ii) क्रीडामि

(iii) क्रीडसि (iv) क्रीडन्ति

(र) सः भिक्षुकाय भिक्षां ..... ।

(i) ददाति (ii) दत्तः

(iii) ददन्ति (iv) ददासि

(ल) राधा भोजनं ..... ।

(i) खादसि (ii) खादामि

(iii) खादिष्यति (iv) खादति

खण्ड–घ

(पठित-अवबोधनम्)

10. (अ) अधोलिखित-गद्यांशेषु कस्यचिदेकस्य गद्यांशस्य हिन्दी भाषायां अनुवादं कुरुत- 5

(क) एतत् आकर्ण्य जीमूतवाहनः अचिन्तयत्- "अहो ईदृशं अमरपादपं प्राप्यापि पूर्वैः पुरुषैः अस्माकं तादृशं फलं किमपि न प्राप्तम्। किन्तु केवलं कैश्चिदेव कृपणैः कश्चिदपि अर्थः अर्थितः। तदहम् अस्मात् कल्पतरोः अभीष्टं साधयामि" इति। एवं आलोच्य सः पितुः अन्तिकम् आगच्छत्। आगत्य च सुखमासीनं पितरम् एकान्ते न्यवेदयत् - "तात! त्वं तु जानासि एव यदस्मिन् संसारसागरे आशरीरम् इदं सर्वं धनं वीचिवत् चञ्चलम्

(ख) तस्मिन्नेव ग्रामे एका अपरा लुब्धा वृद्धा न्यवसत्। तस्या अपि एका पुत्री आसीत्। ईर्ष्यया सा तस्य स्वर्णकाकस्य रहस्यम् ज्ञातवती। सूर्यातपे तण्डुलान् निक्षिप्य तयापि स्वसुता रक्षार्थं नियुक्ता। तथैव स्वर्णपक्षः काकः तण्डुलान् भक्षयन् तामपि तत्रैवाकारयत्। प्रातस्तत्र गत्वा सा काकं निर्भर्त्सयन्ती प्रावोचत् "भो नीचकाक! अहमागता मह्यं तण्डुलमूल्यं प्रयच्छ"।

(आ) अधोलिखितयोः पद्यांशयोः कस्यचित् एकस्य पद्यांशस्य हिन्दी-भाषायां अनुवादं कियन्ताम्- 5

(क) ललित-पल्लवे पादपे पुष्प पुञ्जे
मलयमारुतोच्चुम्बिते मञ्जुकुञ्जे,
स्वनन्तीन्ततिम्प्रेक्ष्य मलिनामलीनाम्
निनादय .....।।

(ख) श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्।
आत्मनः प्रतिकूलानि परेषां न समाचरेत्।।

11. (अ) अधोलिखितं गद्यांशं पठित्वा तदाधारित प्रश्नानां उत्तराणि लिखत- 5

(क) आसीत् कस्मिंश्चित् अधिष्ठाने जीर्णधनो नाम वणिक्पुत्रः। तस्य गृहे लौहघटिता पूर्वपुरुषोपार्जिता तुलासीत्। तां च कस्यचित् श्रेष्ठिनो गृहे निक्षेपभूतां कृत्वा देशान्तरं प्रस्थितः। ततः सुचिरं कालं देशान्तरं यथेच्छया भ्रान्त्वा पुनः स्वपुरं आगत्य तं श्रेष्ठिनं अवदत्- "भो श्रेष्ठिन्! दीयतां मे सा निक्षेपतुला" सोऽवदत् "भोः! नास्ति सा, त्वदीया तुला मूषकैः भक्षिता" इति

(क) एक पदेन उत्तरत : 2

(i) लौहघटिता का आसीत्?

(ii) तुला कैः भक्षिता?

(ख) पूर्णवाक्येन उत्तरत : 1

(i) वणिक्पुत्रः देशान्तरात् आगत्य श्रेष्ठिनं किं उवाच?

(ग) निर्देशानुसारं उत्तरत्- 2

(i) 'लौहनिर्मिता' इत्यस्य अत्र कः पर्यायः?

(ii) 'मूषकैर्भक्षिता' इति शब्दस्य सन्धिच्छेदं कुरुत।

(आ) अधोलिखितं पद्यांशमधीत्य तदाधारितप्रश्नानां उत्तराणि लिखत- 5

गुणा गुणज्ञेषु गुणा भवन्ति
ते निर्गुणं प्राप्य भवन्ति दोषाः।
आस्वाद्यतोयाः प्रवहन्ति नद्यः
समुद्रमासाद्य भवन्त्यपेयाः॥

(क) एकपदेन उत्तरत- 2

(i) गुणाः केषु गुणाः भवन्ति?

(ii) आस्वाद्यतोयाः काः प्रवहन्ति?

(ख) पूर्णवाक्येन उत्तरत- 1

गुणाः कदा दोषाः भवन्ति?

(ग) निर्देशानुसारं उत्तरत: 2

(i) 'गुणा:' इत्यस्य प्रयुक्तं विलोमपदं किम्?

(ii) 'प्राप्य' अत्र प्रकृति-प्रत्यय-निर्देशं कुरुत।

12. रेखाङ्कित-पदान्यधिकृत्य प्रश्नानां निर्माणं कुरुत (चतुर) 4

(अ) **जीर्णधन:** विभवक्षयात् देशान्तरं गन्तुमिच्छन् व्यचिन्तयत्।

(ब) **श्रेष्ठिन:** शिशु: स्नानोपकरणमादाय **अभ्यागतेन** सह प्रस्थित:।

(स) वणिक् गिरिगुहां **बृहच्छिलया** आच्छादितवान्।

(द) सभ्यै: तौ परस्परं सम्बोध्य **तुला-शिशु-प्रदानेन** सन्तोषितौ।

13. निर्देशानुसारं कुरुत -

(अ) अधोलिखित पदानां प्रकृति-प्रत्ययं च संयोज्य/विभज्य च लिखत- 6

(i) करणीयम् ..... + ...

(ii) वि + क्री + ल्यप् .....

(iii) पठितुम् ..... + ...

(iv) ताडय् + क्त्वा .....

(ब) विशेषणै: सह विशेष्याणि योजयत -

(i) आस्वाद्यतोया:	खलानां मैत्री
(ii) गुणयुक्त:	सज्जनानां मैत्री
(iii) दिनस्य पूर्वार्द्धभिन्ना	नद्य:
(iv) दिनस्य परार्द्धभिन्ना	दरिद्र:

(स) भिन्नवर्गीयं पदं चिनुत -

(i) अधिरोढुम्, गन्तुम्, सेतुम्, निर्मातुम।

(ii) नि:श्वस्य, चिन्तय, विमृश्य, उपेत्य।

(iii) विश्वसिमि, पश्यामि, करिष्यामि अभिलषामि।

(iv) तपोभि:, दुर्बुद्धि: सिकताभि:, कुटुम्बिभि:।

*****